कठश्रुत्युपनिषत्

अथ कठश्रुत्युपनिषत्

ॐ । योऽनुक्रमेण संन्यसति स संन्यस्तो भवति । कोऽयं संन्यास उच्यते । कथं संन्यस्तो भवति । य आत्मानं क्रियाभिः सुगुप्तं करोति मातरं पितरं भार्यां पुत्रान्सुहृदो बन्धूननुमोदयित्वा ये चास्यर्त्विजस्तान्सर्वांश्च पूर्ववद्वृणीत्वा वैश्वानरीमिष्टिं कुर्यात् । सर्वस्वं दद्यात् । यजमानस्याङ्गानृत्विजः सर्वैः पात्रैः

---

1. For the title see Preface and variants of colophon. अथ संन्यासोपनिषत् । etc., SR; see Bsa. Up.

2. संन्यस्यति Ta-b, G6.

3. इत्युच्यते for उच्यते G6.

4. No य in Śb; यत्र Gc. No सु SR.

5. भार्यां not in Ga; भार्याः Db. सुहृदो not in SR save D4.

6. वैश्वानरेष्टिं SR save D4. निर्वपेत् for कुर्यात् SR save D4.

7. °स्याङ्गम् for °स्याङ्गान् Śb; ऋत्विज ऋत्विजः for ऋत्विजः Db, Śb; °स्य गा (गां Ta) ऋत्विजः SR. पात्रैः corr. to पत्रैः Śb.

समारोप्य यदाहवनीये गार्हपत्येऽन्वाहार्यपचने सभ्यावसथ्ययोश्च प्राणापानव्यानोदानसमानान्सर्वान् सर्वेषु समारोपयेत् । सशिखान्केशान्निष्कृत्य, विसृज्य यज्ञोपवीतं, निष्क्रम्य, पुत्रं दृष्ट्वा, त्वं ब्रह्म त्वं यज्ञस्त्वं सर्वमित्यनुमन्त्रयेत् । यद्यपुत्रो भवत्यात्मानमेवं ध्यात्वानवेक्षमाणः प्राचीमुदीचीं वा दिशं प्रव्रजेत् । चतुर्षु वर्णेषु भैक्षचर्यं चरेत् । पाणिपात्रेणा-

---

1. यथा° D4. °त्ये वान्वाहार्य° SR.

2. °सक्थ्ययोश्च Ta-b, M; °सथयोश्च NR save Da, Bik.2, C. No च G6.

2—3. सर्वान्सर्वेषु समारोपयेत् twice in C; followed by प्रथमः खण्डः [॥१]॥ in Dc, Sa, Bik.1-2, C.

3. सशिखां Tb. छित्वा for निष्कृत्य Ta; परित्यज्य G6; उत्पाट्य Ta-b, Ga; nothing D4, M, B. विसृज्य not in G6.

4. छित्वा for निष्क्रम्य G6, D4, B, M; निश्रम्य d. ब्रह्मा C, D4, B; ब्राह्मणः Ga.

5. °येत् ॥१॥ यद्य° Do. यद्यदपुत्रो Tb, Gc; यद्यप्रजा T 17.

6. एवं Sb, C, Ān., Nār., SR; others एव. °वेक्ष° SR save Ta-b; °वेक्ष्य° Da, Sb, d; others °पेक्ष°; *cf.* below, p. ३७, l. 3. °माणं C. प्राचीमुदीचीं वा दिशं not in Ta. वा inserted after दिशं by Db-c, Sa-b, d, Ta.

7. त्रिषु वर्णेषु Tb, Ga-c, Bc; चतुर्वर्णेषु Vaidy. भैक्ष° C,

शनं कुर्यादौषधवत्प्राश्नीयाद्यथालाभमश्नीयात्प्राण-संधारणार्थं यथा मेदोवृद्धिर्न जायते कृशीभूत्वा । ग्राम एकरात्रं, नगरे पञ्चरात्रं, चतुरो मासान्वार्षिकान्ग्रामे वा नगरे वापि वसेत् । विशीर्णं वस्त्रं वल्कलं वा प्रतिगृह्य नान्यत्प्रतिगृह्णीयात् । यद्यशक्तो भवति येन क्लेशसहः स तप्यते तप इति ।

---

d, भैक्षा° De-4, Ta-b, Ga-c-6; भैक्ष्या° Sb; भिक्षा° M; भिक्ष° B; others भैक्ष्य°. °चर्यां Da, d.

1. औषधवदशनमाचरेदौषधवदशनं प्राश्नीयात् SR save Tb; औषधवदशनं प्राश्नीयात् only, Tb. यथायथालाभम् De, Bik. 1-2.

2. कृशो G6, M, B; ऋषि (!) d. Instead of कृशीभूत्वा Visv. has: ऽरण्यनिष्ठो भिक्षार्थी ग्रामं प्रविशेत् ।

3. ग्रामैक° D4, M.

4. वा नि° for वापि Ta. After वसेत् SR adds: पक्षा वे मासा इति द्वौ मासौ वा वसेत्. विशीर्णवस्त्रं Ta-b, G6, M.

5. प्रतिगृह्यमाणो for प्रतिगृह्य Dj, Bik.1, Sa-b, d, C; प्रतिगृह्णीयात् SR.

6. येन *er conj.*; यो नः Do; यो न other NR; nothing SR. यो नक्लेशः Nār. क्लेश——इति Di only; क्लेशसहः स तस्य तप इति Db; *id.*, but क्लेशः स ह De-k-n, d; क्लेशः स तस्य तप इति Da; क्लेशः स तपते त (so) तप इति Bik.1; क्लेशः सहः (so) स तप्यते तप इति Sb; क्लेशः सहः स तस्य ते तप इति Dj-o; क्लेशः स तप्यते तप इति Sa, C; क्लेशतस्तस्यते तपं इति G6; क्लेशतस्तप्यते तप इति

यो वा एवं क्रमेण संन्यसति यो वा व्युत्तिष्ठति किमस्य यज्ञोपवीतं कास्य शिखा कथं चास्योपस्पर्शनमिति । तान्होवाच । इदमेवास्य तद्यज्ञोपवीतं यदात्मध्यानं, या विद्या सा शिखा, नीरैः सर्वत्रावस्थितैः कार्यं निर्वर्तयेन्नोदपात्रे । जलतीरे निकेतनं हि ब्रह्मवादिनो वदन्ति । अस्त-

---

other SR. तप इात ॥२॥ Do.

1. संन्यस्यति SR, Visv.; संन्यस्य Gc. यो वा (second) missing in Dc. एवं पश्यति for व्युत्तिष्ठति SR.

2. का वास्य for कास्य NR, Visv. चा° Da-b; others वा°.

3. तं for तान् SR, Visv.

4. यथात्मध्यानं Ta-b; यदात्मज्ञानं Gc. या Db, S'b, G6; missing elsewhere. विद्यात्सा Ta-b, D4, Bk. No सा G6, M, Visv. नीचैः Bik.2; नीतैः Dc; नीरः S'b; नीतरैः d; नरैः Tb; निकृत्तैः T17; निर्वैरः M, Bk; निवैरं G6.

5. °त्रोप° for °त्राव° T17. °तेः G6, M; °ते Bk. निर्वर्तयेन्नो° Visv. (p. २४); निवर्तयन्नु Db-i-k-l; others, save Cx, निर्वर्तयन्नु°; Cx, विवर्त्तयन्नु°. उदयात्रे Db; उदपात्रेण Cx: उदपाद (!) T17; उदरपात्रेण SR. †

5—6. जलतीर° Db: नदीतीरे Ga: भुञ्जतिरे (!) G6.

6. ह for हि Da-c; nothing SR. °वासिनो S'b.

मित आदित्ये कथं चास्योपस्पर्शनामिति । तान्हो-
वाच ।

यथाहनि तथा रात्रौ नास्य नक्तं न वा दिवा ।
तदप्येतदृषिणोक्तं । सकृद्दिवा हैवास्मै भवति । य
एवं विद्वानेतेनात्मानं संधत्ते संधत्ते ।

प्रथमः खण्डः ॥ १ ॥

देवा ह वै समेत्य प्रजापतिमब्रुवन् । न वि-
दामो न विदाम इति । सोऽब्रवीद्ब्रह्मिष्ठेभ्यः । मे
तद्वदतो ज्ञास्यथेति । ततो वै ते ब्रह्मिष्ठा न
वदन्तो न वदन्त इत्येतत्सर्वम् । देवानां सार्ष्टि-

---

1. चा° Da-b-c, Śa, d, Ta, G6; others वा.

3. No वा in SR.

5. विद्वान्तेनात्मानं Śa-b; विद्वांस्तेनात्मानं Dj; विद्वाननेनात्मानं Dn; विद्वान् नैतेनात्मानं C, Nār. संधत्ते[2] missing in d, Bik.1, SR.

6. द्वितीयः खण्डः ॥[२ ॥] Dc, Śa, Bik.1-2, C; ॥३॥ only, Do. For SR see Bsa. Up.

7—2 (p. ३६). This section in NR only; see Preface.

7. No न[1] Cк.

8—9. मे तद्वदतो not in Dc. 10. °न्ता for °न्तो Dc, d.

तां सालोक्यतां सायुज्यतां गच्छति य एवं वेद । १ ।

[देवा ह वै भगवन्तमब्रुवन् । अधीहि भगवन् ब्रह्मविद्याम् । स प्रजापतिरब्रवीत् ।] सशिखान्केशान्निष्कृत्य, विसृज्य यज्ञोपवीतं, निष्क्रम्य, पुत्रं दृष्ट्वा, त्वं ब्रह्म त्वं यज्ञस्त्वं वषट्कारस्त्वमोंकारस्त्वं स्वाहा त्वं स्वधा त्वं धाता त्वं विधाता त्वं त्वष्टा त्वं प्रतिष्ठासीति वदेत् । अथ पुत्रो वदति । अहं ब्रह्माहं यज्ञोऽहं वषट्कारोऽहमोंकारोऽहं स्वाहाहं स्वधाहं धाताहं

---

1. °कतां for °क्यतां d. सायो° Da-b, d.

3—4. देवा——अब्रवीत् SR only, introduced by: अथ कठोपनिषत् (याजुषी कठोपनिषत् Gb, M; कठरुद्रोपनिषत् B) । परिव्रज्याधर्मपूगालङ्कारा यत्पदं ययुः । तदहं कठविद्यार्थं रामचन्द्रपदं भजे (Tb, B only) ॥ ॐ सह नाववत्विति शान्तिः ।.

4—5. निष्कृष्य Ta-b, M, B; निकृत्य Visv. 3 MSS. out of 5.

6. त्वमोंकारः missing in Sa-b.

7—8. त्वं त्वष्टा त्वं प्रतिष्ठासीति missing in Ta-b.

8. वदेत् not in NR.

9. स्वाहाहं स्वधाहं not in De, Sb.

विधाताहं त्वष्टाहं प्रतिष्ठास्मीति । तान्येतानि । अनुव्रजन्नाश्रुमापातयेत् । यदश्रुमापातयेत्प्रजां विद्यां छिन्द्यात् । प्रदक्षिणमावृत्येतश्चेतश्चानवेक्षमाणाः प्रत्यायन्ति । स स्वर्ग्यो भवति । २ ।

ब्रह्मचारी वेदमधीत्य वेदौ वेदान्वा चरितब्रह्मचर्यो दारानाहृत्य पुत्रानुत्पाद्य ताननुरूपाभिर्वृत्तिभिर्वितत्येष्ट्वा च शक्तितो यज्ञैस्तस्य संन्यासो गुरुभि-

---

1. विधाताहं not in Sb. त्वष्टाहं not in Bik.1.

2. यद्यश्रुम् Sa, Ga. प्रजा Bik.1-2; प्रजान् Da-c, Sa, d.

2—3. विद्यात् Da-c, Sa, d; विंद्यात् Bik.2; त्विद्या (!) Db.

3. °त्येतश्चेतश्चा° d only; °त्येतच्चेतच्चा° other NR save C; °त्यैतच्चैतच्चा° C, SR, Nār. °पे° for °वे° Bik.1. °क्ष्य° NR save Sa, C. °माणः for °माणाः Db-c-i-j, Sa, Ta-b.

4. प्रत्यायेति Da-b-k-n-o, Sa-b; प्रत्यायति Di-j. स्वर्गो C and variant of Tb. स स्वर्ग्यो भवति Du-12, Ta-b, Gb, M, B; twice in others, but no स[2] in Da, Sb. तृतीयः खण्डः ॥ [३॥] Dc, Sa, Bik.1-2, C; nothing SR.

5—6. For वेदौ——°चर्यो SR reads वेदोक्ताचरितब्रह्मचर्यो.

6. ताननुपा° B. °पादिभिः for °पाभिः Ta-b, Ga, M, B.

7. °त्येष्ट्या Ta. तस्य not in Ga, M. संन्यासे Tb; संन्यसेद् Ga, M.

रनुज्ञातस्य बान्धवैश्च । सोऽरण्यं परेत्य द्वादशरात्रं पयसाग्निहोत्रं जुहुयाद् द्वादशरात्रं पयोभक्षः स्यात् । द्वादशरात्रस्यान्तेऽग्नये वैश्वानराय द्वादशकपालं निर्वपेत्, प्रजापतये च प्राजापत्यं चरुं, वैष्णवं त्रिकपालम् । अग्निसंस्थितानि पूर्वाणि दारुपात्राण्यग्नौ जुहुयात् । मृण्मयान्यप्सु जुहुयात् । तैजसानि गुरवे दद्यात् । मा त्वं मामवहाय परागा नाहं त्वामवहाय परागामित्येवं गार्हपत्यमेवं दक्षिणाग्निमेवमाहवनीय-

---

1. °तश्च for °तस्य Ga, M. चरेद्य for परेत्य Db, Sa-b.

2. स्यात् not in Bik.2.

3—4. The words द्वादशकपालं निर्वपेत् added *ex conj.*; *cf.* Visv. (p. १३): तथा च श्रुतिः । आग्नेयीमेव कुर्यात् । अग्नये वैश्वानराय द्वादशकपालं पुरोडाशं निर्वपति । प्राजापत्यं चरुं वैष्णवं नवकपालं चेति ।

5. अग्निं for अग्नि- Dc, Sb, d, Ta-b, Ga, B.

6. गुरुवे (!) Db, Sb.

7. मामपहाय for मामवहाय Ga, Tb (altered to °वहाय), M, B. प्रागाः for परागा d; परागां Sa. त्वामपहाय for त्वामवहाय Ta, Tb (altered to °वहाय), Ga, M, B.

8. गार्हपत्यमेवं C only; other NR गार्हपत्यमित्येवं.

8—1(p. ३९). परागामिति गार्हपत्यदक्षिणाग्न्याहवनीयेष्वरणिदेशाद् SR.

मरणिदेशाद्धस्ममुष्टिं पिबेदित्येके । सशिखान्केशान्निष्कृत्य विसृज्य यज्ञोपवीतं भूः स्वाहेत्यप्सु जुहुयात् । अत ऊर्ध्वमनशनमपां प्रवेशमग्निप्रवेशं वीराध्वानं महाप्रस्थानं वृद्धाश्रमं वा गच्छेत् । स यत्सायं प्राश्नीयात्सोऽस्य सायंहोमो यत्प्रातः सोऽयं प्रातः, यद्दर्शे तद्दर्शं यत्पौर्णमासे तत्पौर्णमास्यं, यद्वसन्ते केशश्मश्रुरोमनखानि वापयेत्सोऽस्याग्निष्टोमः सोऽस्याग्निष्टोमः । ३ ।

द्वितीयः खण्डः ॥ २ ॥

1*. °दशात् for देशात् Bik.1-2. सशिखां Ta-b.

1—2. निष्कृष्य SR; निकृत्य Visv. 3 MSS. out of 5.

3. अग्निं for अग्नि° Sa-b, Bik.1.

4. स यत्सायं *or conj.*; स यः सायं NR; पयसा यं Ta-b, M, B; पयसा Ga.

6. तद्दर्शे Ta-b, B; तद्दर्शनं Ga, M; तद्दर्शो Db; तद्दार्श Bik.1; तद्दर्शे others. °मासे Db only; °मास्ये others. °मास्यं SR; °मासो Db; °मास्ये (again) other NR. यद्वसेत् Sa.

7. °लोम° for °रोम° Dc, Bik.1-2, C, SR. °होमः for °ष्टोमः Bik.2; °सोमः Bik.1. 7—8. सोऽस्याग्निष्टोमः° not in SR.

9. चतुर्थः खण्डः ॥ [४] ॥ Dc, Sa, Bik.1-2, C; nothing SR.

संन्यस्याग्नीन्न पुनरावर्तयेत् ।

यन्मन्युर्जायामावहत् [.....

.....

.....तस्माच्छवोध्युच्यते ॥]

इत्यध्यात्ममन्त्राञ्जपेत् । स्वस्ति सर्वजीवेभ्य इत्युक्त्वा दीक्षामुपेयात् । काषायवासाः । कक्षोपस्थलोमान्वर्जयेत् । लघुमुण्डोऽसूत्रोदरपात्रः । कस्मादित्यध्यात्मम-

---

1. संन्यासा° Di-n-o, Sa-b, d. °ग्निं न SR.

2. मामन्युः for यन्मन्युः Db-c, d; मामन्युं Sa-b, Visv. 2 MSS.; मामन्यं Visv. 1 MS.; मापत्यं Visv. 1 MS.; यन्मन्युं Dc; यन्मर्त्युः Bik.1; यन्मृत्युः SR. °वहयेद् for °वहत् Sa, d; °चाहवेद् Dc; °वाहयेद् other NR and Visv.; °वहम् SR.

5. इत्यथाध्यात्म° Bik.1, C; इत्याध्यात्म° Db-c, Bik.2, Ta. पठेत् for जपेत् SR.

6—7. दीक्षा°——कस्मादिति not in SR.

6. °वासाः Bik.2, Visv.; °वासा Dc; others °वासः (no Visarga in Sa-b). °स्थं Sa-b, d.

6—1 (p. ४१). कक्षोपस्थरोमा लघुमुण्डोदरपात्रो [2 MSS. out of 4 insert दपात्रो] दकस्मादित्यध्यात्ममस्य ध्यायत ऊर्ध्व° Visv. p. २२ ("काठकब्राह्मणम्").

7. लघुमुंडा° Bik.2; लघुदण्डो Sa. °पात्रं C.

7—1 (p. ४१). आत्मानमनन्यं for अध्यात्ममस्य SR.

स्य ध्यायते । ऊर्ध्वबाहुर्विमुक्तमार्गो भवेदनिकेतश्च-
रेत् । भिक्षाशी न दद्यात् । पवित्रं धारयेज्जन्तुसंरक्ष-
णार्थं । वर्षावर्जम् । इति । तदपि श्लोकाः ।

कुण्डिकां चमसं शिक्यं त्रिविष्टब्धमुपानहौ ।
शीतोपघातिनीं कन्थां कौपीनाच्छादनं तथा ॥
पवित्रं स्नानशाटीं च उत्तरासङ्गमेव च ।
यज्ञोपवीतं वेदांश्च सर्वं तद्वर्जयेद्यतिः ॥

1*. ध्यायंस्तद् for ध्यायते SR save Ta; ध्यायेद् Ta. ऊर्ध्व SR save Tb; ऊर्ध्वगो for ऊर्ध्व NR, Tb. बाहुः SR (save Tb) and C; वायुः S'a, Visv.; पायुः others (बाहुः and पायुः Nār.). वियुक्त° Da, S'a, d; विमुक्ति° Ga.

2. भिक्षाशीनं न दद्यात् Visv. 2 MSS. out of 4. यत्किञ्चिन् inserted after भिक्षाशी by Tb, M, B; यत्किञ्च by Ta. नादद्यात् (alt. from न दद्यात्) Db; न दध्यात् S'a, M. पवित्रं *ex conj.* (see above p. २१); लवैकं all save d, Visv.; लब्धकं (!) d; प्रणवैकं Visv. p. २२; प्लवैकं Visv. p. २५; ब्रह्मवैकं द्याप्लवंकैर्धार° (!) Visv. p. २२ note (1 MS.). न धावयेत् for धारयेत् SR.

3. वर्षवर्जम् SR. श्लोकः (so) NR; श्लोका भवन्ति SR.

4. °ष्टब्ध° Dc-l-m-o-12-13, Bik.1-2, Ān; others °ष्टप°.

6. °साटीं Da-b, Ta.

स्नानं पानं तथा शौचमद्भिः पूताभिराचरेत् ।
नदीपुलिनशायी स्याद्देवागारेषु वा स्वपेत् ॥ ३ ॥
नात्यर्थं सुखदुःखाभ्यां शरीरमुपतापयेत् ।
स्तूयमानो न तुष्येत निन्दितो न शपेत्परान् ॥ ४ ॥
[ब्रह्मचर्येण संतिष्ठेदप्रमादेन मस्करी ।
दर्शनं स्पर्शनं केलिः कीर्तनं गुह्यभाषणम् ॥ ५ ॥
संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च ।
एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः ॥ ६ ॥
विपरीतं ब्रह्मचर्यमनुष्ठेयं मुमुक्षुभिः ।]
एतां वृत्तिमुपासन्तो घातयन्तीन्द्रियाणि च ॥७॥

तृतीयः खण्डः ॥ ३ ॥

कठश्रुत्युपनिषत्समाप्ता ॥

---

1. पानं SR; ध्यानं Dm-12, Ān., Nār.2; दानं other NR. †

5—9. These 2½ Slokas are in SR only where they conclude the section on Samnyāsa (see Preface).

10. °सीत for °सन्तो Dc, Bik.1. घातय° C only; others तापय°. यदिति for च Db, Sa, d.

11. पञ्चमः खण्डः ॥[५॥] Dc, Sa, Bik.1-2, C; ॥४॥ Dm, Ān.

12. कठश्रुतिः Dc and (corr. from कण्ठ°) Db; कठश्रुतिरुप° D12; कठश्रुत्युप° Di-13; कथश्रुतिः Bik.1; कण्ठश्रुत्युप° others. अथर्ववेदे added by Da, Sb, d.